# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री-1 (SEM-2)** **प्रश्नपत्रम् – 5** गुणाः –70

विषयः – पुराणेतिहासः **कोड –C. C.1.2.3 (New/Old)** समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –15/04/2019 सन्दर्भग्रन्थः – श्रीद्भागवतमहापुराणे तृतीयस्कन्धः

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 द्वयोः ससन्दर्भंप्रसङ्गं व्याख्या कार्या। 10**

(1) कर्माण्यनीहस्य भवोऽभवस्य ते दुर्गाश्रयोऽथारिभयात्पलायनम्।
कालात्मनो पत्युमदायुताश्रयः स्वात्मन्रतेः खिद्यति धीर्यदामिह ॥

(2) सुखाय कर्मणि करोति लोको न तैः सुखं वाऽन्मदुपारमं वा।
विन्देत भूयस्तत एव दुःखं यदत्र युक्तं भगवान् वदेन्न ॥

(3) यत्सेवया भगवतः कूटस्थस्य मधुद्विषः।
रतिरासो भवेत्तीव्र पादयोर्व्यसनार्दनः ॥

**प्रश्नः-2 उद्धवेन विदूराग्रे प्रोक्ताः भगवतः विविधानां लीलानां वर्णनं यथाग्रथं क्रियताम्। 10**

**अथवा**

**विराटशरीरोत्पत्तिं ब्रह्मणोत्पत्तिश्च लिखत।**

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 द्वयोः ससन्दर्भंप्रसङ्गं व्याख्या कार्या। 10**

(1) इतिहासपुराणानि पञ्चमं वेदमीश्वरः।
सर्वेभ्यः एव वक्त्रेभ्यः ससृजे सर्वर्शनः ॥

(2) कामं भयः स्ववृजिनैर्निरयेषु नः स्ताच्चेतोऽलिवद्यदि नु ते पद्यो रमेत्।
वाचश्च नस्तुलसिवद्यदि तेऽघ्रि शोभाः पूर्येत ते गुणगणैर्यदि कर्णरन्ध्रः ॥

(3) तावत्प्रसन्नो भगवान् पुष्कराक्षः कृते युगे।
दर्शयामास तं क्षत्तः शाब्दं ब्रह्म दधद्वपुः ॥

**प्रश्नः-4 जयविजयोः कथासारांशं लिखत। 10**

**अथवा**

**हिरण्याक्ष हिरण्यकशिप्योः जन्मकथां विलिख्य हिरण्याक्षस्य दिग्विजयं लिखत।**

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः ससन्दर्भंप्रसङ्गं व्याख्या कार्या।** **10**

(1) श्र चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभम्।
विविक्त उपसङ्गाम्य प्रणम्य समभाषत ॥

(2) वासुदेवे भगवति सर्वज्ञे प्रत्यगात्मनि।
परेण भक्तिभावेन लब्धात्मा मुक्तबन्धनः ॥

(3) सत्यं शौचं दया मौनं बुद्धिः श्रीर्ह्रीर्यशः क्षमा।
शमो दमो भगश्चेति यत्सङ्गाद्याति सङ्क्षयम् ॥

**प्रश्नः-6 प्रकृतिपुरुषयोः विवेकं यथागत्थं विलिख्य भक्तियोगस्य मर्मं लिखत।** **10**

**अथवा**

**कपिलमुनिना प्रोक्तम् अष्टाङ्गयोगशास्त्रं विलिख्य भक्तियोगस्य उत्कृष्टतां लिखत।**

**प्रश्नः-7 दशानां लघूत्तराणि लिखत।** **10**

(1) भागवते कति स्कन्धाः?
(2) भागवते कति अध्यायाः?
(3) ब्रह्मणा आदौ कति विधा सृष्टि विरचिता?
(4) मैत्रेयस्य पितुः नाम किम्?
(5) देवहूत्याः पितरौ कौ?
(6) कपिलस्य शास्त्रं किम्?
(7) पञ्चतन्मात्राः काः?
(8) योगस्याङ्गानि कानि?
(9) ज्ञानेन्द्रियाणि कति?
(10) कर्दमऋषेः आश्रमः कस्याः नद्याः तटे आसीत्?
(11) कस्य वधाय वराहवतारः?
(12) जयविजयौ कौ आस्ताम्?
(13) सनत्कुमाराः कति वर्षीयाः?
(14) कपिलः मात्रे कुत्र उपदेशं ददाति?
(15) तृतीयस्कन्धे कति अध्यायाः?